दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-26 | 1 | नवम्बर, 17 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् मार्गशीर्षकृष्णत्रयोदशी
मार्गशीर्ष २ प्रविष्ठांशः मङ्गलमयः भवेत्

2 मुख्यमंत्री सुक्खुः गृहमन्त्रिणः समक्षं चण्डीगढे हिमाचलस्य ७.९% भागस्य विषयं उत्थापयिष्यति;

3 उत्तराखण्डसंस्कृताकादम्या आयोजिते संस्कृत महोत्सवे खण्डस्तरीय कनिष्ठवर्गीय संस्कृतस्पर्धाः सम्पन्नाः

4 २०२८ तमवर्षपर्यन्तं इसरो चन्द्रयान-४ इत्यस्य प्रक्षेपणं भविष्यति

## प्रधानमन्त्री श्रीनरेन्द्रमोदी गुजरातस्य सूरते भारतस्य प्रथमबुलेटरेलयानपरियोजनायाः दलीयकर्मिभिः सह वार्तालापम् अकरोत्, कार्यप्रगतेश्च समीक्षामपि विहितवान्



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना एतस्मिन् विषये बलाघातः कृतः यत् प्रत्येकं भारतवासी एवंविधं चिन्तनं कुर्यात् यत् सः देशस्य विकासस्य किं नवीनं विशिष्टं वा कर्तुं पारयेत्। यदा एतादृशी देशप्रेमभावना भवति तदा सा प्रेरणास्रोतोरूपेणापि जायते, श्रीमोदिना सूरते भारतस्य प्रथमबुलेटरेलयान-परियोजनानायाः समीक्षायाः अनन्तरं परियोजनादलेन सह वार्तालापः कृतः, प्रधानमन्त्रिणा बुलेटरेलयानयोजनायाः तुलना भारतीयान्तरिक्षयात्रया सह कृता, तथा च स्मृतं यत् येन देशस्य प्रथमोपग्रहः प्रक्षेपितः, तादृशः वैज्ञानिकदलं स्मर्यते अपि च तत् दलमपि गौरवम् अनुभवति, सम्प्रति तु भारतेन शताधिकोपग्रहाः प्रक्षेप्यन्ते। प्रधानमन्त्रिणा परियोजनायाः समीक्षणं कृतं तथा च यथाकालं पूर्णता भवेत् इत्यपि संकल्पितम्, कार्यकर्तृभिः श्रीमोदी आश्वासितं यत् परियोजनाः काठिन्यं विना समीचीनरूपेण प्रवर्तते, श्रीमोदिना तत्र लग्नाः कर्मचारिणः प्रेरिता यत् ते स्वीयान् अत्रत्यानुभवान् लिखेयुः अपि च अग्रे अन्येषां जनानां कृते तैः लाभो भवितुं शक्नोति, देशे यदि प्रथमबुलेटरेलयानपरियोजनाप्रयोगः सफलीभवति तर्हि अग्रे देशे एतस्य कार्यान्वयनदिशि निर्णयकरूपेण मार्गः प्रशस्तो भविष्यति, प्रधानमन्त्रिणा इदमपि कथितं यत् अनुकरणं तदा सार्थकं भविष्यति यदा सुस्पष्टतया तस्य ज्ञानं स्यात् तथा च तदनुरूपमेव प्रयासाः भवेयुः, श्रीमोदिना तत्र परामृश्टं यत् एवंविधकार्यं स्यात् येन अग्रेपि छात्राः एतस्यां दिशि लाभान्विताः प्रेरिताः च भवेयुः, समर्पणभावनया जीवनमत्र समर्पितं स्यात् तदैव देशार्थं वयं किमपि बहुमूल्यं परित्यज्य गच्छामः।

## उत्तरप्रदेशस्य सोनभद्रजनपदे एकस्याः खानकगुहायाः भूमौ निमज्जनात् एकस्य कर्मिणः मरणं संजातं अपि च दशाधिकजनाः तत्र भूमिसात् संजाताः इति आशङ्क्यते



**हिमसंस्कृतवार्ताः** - उत्तरप्रदेशस्य सोनभद्रजनपदे एका खननगुहा भूमिसात् संजाता तत्र च कार्यं कुर्वतः एकस्य कर्मिणः मृत्युः संजातः द्वादशाधिकजनाश्च तत्र गुहाबद्धाः सन्ति इति आशङ्क्यते। आपदाप्रबन्धनदलानि स्थानीयप्रशासनस्य च आपदामोचनदलानि भूमिसात्-जातानां जनानां संरक्षणाय युद्धस्तरेण कार्यं कुर्वन्ति। नैके विविधसुरक्षमोचनदलानां वरिष्ठाधिकारिणः अपि तत्र विद्यन्ते। अपर-आरक्षिमहानिदेशकः पीयूषमोर्डिया असूचयत् यत् ओबरा इत्यस्य बिल्लीमारकुण्डीग्रामे कृष्णामाईसखानकस्य आभ्यन्तरे एका भित्ति भूमिसात् जाता तत्र च नैके श्रमिका भूमौ निमग्नाः संजाताः एकस्य मृतस्य मृतशरीरमपि अवाप्तमस्ति।

## अमेरिकादेशः बहुषु खाद्यवस्तुषु आयातशुल्कं न्यूनीकृतवान्



**हिमसंस्कृतवार्ताः** - अमेरिकादेशः बहुषु खाद्यवस्तुषु आयातशुल्कं न्यूनीकृतवान्। व्हाइटहाउसद्वारा घोषितं यत् उष्टकटीबन्धीयफल-फलरस-चाय-उपस्करादीनि तेषु आयातवस्तुषु सम्मितानि सन्ति येषु पारस्परिककराधास्य कोपि विशिष्टप्रभावो न भविष्यति, अवधेयं यत् पूर्वं श्रीट्रम्पेन भारतात् निर्यातितवस्तुषु पञ्चविंशतिप्रतिशतं शुल्कं स्थापितम् आसीत् अथ च रूसदेशात् तैलायातकारणात् पंचविंशतिप्रतिशतं अतिरिक्तं दण्डात्मकं शुल्कं स्थापितम् आसीत्, मुद्रास्फितेः च नियन्त्रणाय ट्रम्पेन अत्यावश्यकौषधेषु शुल्कं न स्थापितम् आसीत् अपितु करमुक्तता कृता आसीत्, येन च भारतस्य लाभः जातः, अवधेयं यत् भारतदेशः सप्तचत्वारिंशतप्रतिशतं अत्यावश्यक-औषधानाम् आपूर्तिं अमेरिकादेशाय करोति

## छत्तीसगढस्य सुकमाजनपदे सुरक्षाबलैः सह जाते संघर्षे त्रयः माओवादिनः सुरक्षाबलैः मारिताः

**हिमसंस्कृतवार्ताः** - छत्तीसगढस्य सुकमाजनपदे सुरक्षाबलैः सह जाते परस्परसंघर्षे द्वाभ्यां महिलाविद्रिहिणीभ्यां सह त्रयः माओवादिनः सुरक्षाबलैः मारिताः। आरक्षिभिः अनुसारं तुमालपाडक्षेत्रस्य वने माओवादिनानाम् विद्यमानतायाः गुप्तसूचनानन्तरं जनपदीय-रिजर्व-सुरक्षादलेन निरीक्षणाभियाने तत्र अवगतं यत् माओवादिनः मध्ये मध्ये गुलिकाप्रहारान् कुर्वन्ति स्म, सम्प्रति यावत् त्रयाणां माओवादिनां शवाः सुरक्षाबलैः सम्प्राप्ताः सन्ति,। एते माओवादिनः पंचदशलक्षरूप्यकराशिपुरस्कारधारिणः आसन्, सुरक्षाकर्मिभिः घटनास्थलात् एका भुशुण्डिः बीजीएललांचर इति अन्यानि अस्त्राणि विस्फोटकानि चापि अधिकृतानि सन्ति, बस्तररेंजस्य आईजीपी-सुंदरराज पी अकथयत् यत् आरक्षकाणां सुरक्षाबलानां च अतिरिक्तसैन्यदलानि तस्मिन् क्षेत्रे प्रेषितानि सन्ति।

## मेक्सिकोदेशे शनिवासरे सहस्रशः जेन् जेड् युवानः विरोधप्रदर्शनं कृतवन्तः

मेक्सिकोदेशे शनिवासरे सहस्रशः जेन् जेड् युवानः वर्धमानस्य अपराधस्य, भ्रष्टाचारस्य, हिंसायाः दण्डहीनतायाः, सार्वजनिकहत्यायाः, सुरक्षायाः अभावस्य च विरोधं कृतवन्तः। एषः क्रोधः एकस्य महापौरस्य सार्वजनिकहत्यायाः कारणेन अधिकं प्रवर्धितः । नवम्बर्-मासस्य प्रथमे दिनाङ्के मेक्सिकोदेशस्य पश्चिमे मिचोआकान्-राज्ये उरुआपान्-नगरस्य महापौरः कार्लोस् मञ्जो एकस्मिन् आयोजने गोलिकाभिः हतः । क्रुद्धाः जेन् जेड् युवानः राष्ट्रपतेः आधिकारिकनिवासस्थानस्य राष्ट्रियमहलस्य सुरक्षाभित्तिषु क्षतिः कृतवन्तः।

## सुभाषितम्

एको बहूनां मूर्खाणां,
मध्ये निपतितो बुधः।
पद्मः पाथस्तरङ्गाणाम्,
इव विप्लवते ध्रुवम्।।

भावार्थः- यदि एक अकेला विद्वान् व्यक्ति अनेक मूर्खों के समूह में घिर जाता है तो उसकी स्थिति जल की तेज लहरों के बीच में फंसे और बहते हुए एक कमल पुष्प के समान हो जाती है और उस का भ्रमित होकर मुसीबत में पडना निश्चित है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263


सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्वा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## कोलकात्तायाः ईडनगार्डनक्रीडांगणे पुरुषक्रिकेटनिकषप्रतिस्पर्धायां दक्षिणाफ्रीकादलेन भारतीयदलं प्रथमनिकषस्पर्धायां त्रिंशत्धावनाङ्कैः पराजितम्

**हिमसंस्कृतवार्ताः कलकत्ता** - भारतीयपुरुषक्रिकेटप्रतिस्पर्धायां दक्षिणाफ्रिकादलेन कोलकात्तायाः ईडनगार्डनमध्ये भारतीयक्रिकेटदलं त्रिंशत् धावनाङ्कैः पराजितम्, भारतीयदलं त्रिनवति-धावनाङ्केषु एव समाप्तम् आसीत्, तत्र च अफ्रिकादलेन भारताय चतुर्विंशत्यधिकशतं धावनाङ्कानां लक्ष्यं प्रदत्तं परन्तु भारतीयदलेन तत् न प्राप्तं, अवधेयं यत् दक्षिणाफ्रीकादलस्य टेम्बाबबुमा तत्र पंचपंचाशत् धावनाङ्कानां सर्वाधिकयोगदानं स्वीयदलाय अकरोत्।

# मुख्यमंत्री सुक्खुः गृहमन्त्रिणः समक्षं चण्डीगढे हिमाचलस्य ७.१९% भागस्य विषयं उत्थापयिष्यति; एनआरसी-समागमे उत्थापिताः भविष्यन्ति एते विषयाः



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंह सुक्खुः हरियाणाप्रदेशस्य सूरजकुण्डे १७ नवम्बर दिनाङ्के आयोज्य उत्तरक्षेत्रीयपरिषदः (एनआरसी) सत्रे भागं ग्रहीतुं रविवासरे फरीदाबादनगरम् प्राप्तः। पञ्जाबपुनर्सङ्गटनविधानं, १९६६ इत्यस्य अन्तर्गतं हिमाचलप्रदेशस्य चण्डीगढे ७.१९% वैधानिकभागः भवितव्यः, परन्तु राज्येन अधिकारः अद्यापि न प्राप्तः। हिमाचलसर्वकारेण अनेकवारं केन्द्रसर्वकारेण सह एषः विषयः उत्थापितः, परन्तु तस्य समाधानं न लब्धम्। अधुना मुख्यमन्त्री सुक्खुः गृहमन्त्रिणः अमितशाहस्य सान्निध्ये पुनः पूर्णबलेन एतत् विषयं उत्थापयितुं गच्छति।

## हिमाचलप्रदेशस्य अधिकारः न प्राप्तः-

चण्डीगढस्य केन्द्रशासितत्वेऽपि हिमाचलस्य वैधानिकभागः पञ्जाबपुनर्गठनविधानस्य अन्तर्गतं स्पष्टतया परिभाषितः इति सर्वकारः कथयति। तदपि हिमाचलस्य प्रशासनिकवित्तीयभागस्य विषये अधिकारः न प्राप्तः।

## न केवलम् अधिकाराः, अपि तु क्षेत्रीयसन्तुलनम् अपि

प्राप्तसूचनानुसारं मुख्यमन्त्री सुक्खुः सभायां एतयोः विषययोः स्पष्टं, समयबद्धं समाधानं केन्द्रसर्वकारात् आग्रहं करिष्यति। राज्यसर्वकारस्य मतं यत् चण्डीगढे हिमाचलस्य भागः न केवलं अधिकारस्य प्रश्नः, अपि तु क्षेत्रीयसन्तुलनस्य, संवैधानिकप्रावधानानाम् आश्रयस्य च विषयः अस्ति।

### सीमाराज्यसम्बद्धविषयेषु अपि चर्चा भविष्यति

एनआरसी-समागमे सीमाराज्यसम्बद्धेषु अन्येषु विषयेषु अपि चर्चा भविष्यति, परन्तु हिमाचलस्य कृते चण्डीगढस्य भागः, कर्मचारीप्रतिनिधित्वं च प्रमुखौ विषयौ भविष्यतः।

## चण्डीगढ़प्रशासने कर्मचारिणां भागस्य विषयः-

हिमाचलसर्वकारः चण्डीगढप्रशासने कर्मचारीभागस्य विषयमपि उत्थापयिष्यति। सम्प्रति पञ्जाबसर्वकारस्य ६० प्रतिशतं कर्मचारिणः, हरियाणासर्वकारस्य ४० प्रतिशतं कर्मचारिणः च चण्डीगढप्रशासने कार्यं कुर्वन्ति, हिमाचलप्रदेशाय किमपि भागं न दत्तम्। हिमाचलस्य तर्कः अस्ति यत् यतः राज्यस्य सहभागिता अधिनियमस्य अन्तर्गतं प्रतिज्ञाकृता अस्ति, तस्मात् कर्मचारीसंरचनायाम् अपि तस्य आनुपातिकप्रतिनिधित्वं भवितव्यम्।

## मल्लिकार्जुनखड़गे इत्यनेन सह मेलनं नाभवत्-

काङ्ग्रेसस्य वरिष्ठनेता मल्लिकार्जुनः खड़गे, राहुलगान्धी, केसी वेणुगोपालः, रजनीपाटिल, इत्यादिभिः नेतृभिः सह मेलनस्य अपेक्षा आसीत् इति विश्वासः क्रियते स्म। परन्तु मुख्यमन्त्री विलम्बेन दिल्लीनगरम् प्राप्तः रविवासरे सायं ४ वादने फरीदाबादनगरम् च गतः। फलतः काङ्ग्रेस-शीर्षनेतृभिः सह समागमः न सम्भवति स्म। सोमवासरे सायंकाले वा मंगलवासरे वा सभा सम्भवति इति विश्वासः अस्ति।

# धान्यशस्यार्थं कृषकेभ्यः ३९.५२ कोटिरूप्यकाणां भुक्तिः



हिमसंस्कृतवार्ताः- शिमला।प्रदेशस्य कृषकेभ्यः धान्यशस्यस्य ३९.५२ कोटिरूप्यकाणां भुक्तिः मुक्ता अस्ति। राज्ये ४२०३ कृषकाणां कृते धान्यशस्यस्य भुक्तिः मुक्ता अस्ति। अद्यपर्यन्तं राज्ये सर्वत्र धान्यक्रयणकेन्द्रेषु कृषकाणां कृते १७,६८४.९२ मेट्रिकटनधान्यस्य क्रयणं कृतम्। अक्तूबरमासस्य तृतीये दिने धान्यक्रयणकेन्द्राणि उद्घाटितानि, कृषकाणां धान्यस्य क्रयणं च आरब्धम् अस्ति। कृषकाः द्रुतगत्या धान्यक्रयणस्य आरक्षणं कुर्वन्ति। खाद्य- आपूर्तिविभागेन राज्ये सर्वत्र कृषकाणां धानक्रयणार्थं पटलम् उद्घाटितम् अस्ति। कृषकाः स्वधान्यविक्रयणार्थं विभागस्य पटले पञ्जीकरणम् आरब्धवन्तः। एतावता ५८७३ कृषकाः स्वधानसस्यविक्रयणार्थं अन्तर्जालद्वारा पञ्जीकरणं कृतवन्तः। तेषु ५८३२ पञ्जीकरणानां सत्यापनम् अभवत्।

खाद्यापूर्तिविभागेन कृषकाणां धान्यक्रयणप्रक्रिया आरब्धा अस्ति। राज्ये सर्वत्र धान्यक्रयणकेन्द्राणां क्रयणं अक्तूबरमासस्य तृतीयतः १५ दिसम्बर्पर्यन्तं भविष्यति। धान्यस्य मूल्यं प्रतिक्विण्टलं ₹२,४२५ इति निर्धारितम् अस्ति। कृषकेभ्यः धान्यक्रयणार्थं राज्ये एकादशविपण्यः मण्डीः सन्ति। खाद्य-आपूर्तिविभागस्य निदेशकः रामकुमारगौतमः अवदत् यत् विभागेन अस्मिन् वर्षे ३१,१०० मीट्रिकटन धान्यस्य क्रयणस्य लक्ष्यं निर्धारितम् अस्ति। विभागेन कृषकाणां पञ्जीकरणार्थं पटलं निर्मितम्, यत्र धान्यक्रयणसम्बद्धाः सर्वाः सूचनाः प्राप्यन्ते। कृषकाः अस्मिन् पटले कस्मिन्नपि कम्प्यूटरकेन्द्रम् अथवा लोकमित्रकेन्द्रं गत्वा, अथवा स्वस्य मोबाईल- यन्त्रस्य उपयोगेन पञ्जीकरणं कर्तुं शक्नुवन्ति। पञ्जीकरणसमये कृषकाणां कृते टोकनसङ्ख्या, तेषां धानविक्रयणस्य तिथिः च प्रदत्ता भविष्यति। विभागस्य पटले पञ्जीकरणं कर्तुं कृषकाणां आधारस्य, वित्तकोषसंख्यायाः विवरणं च अन्यसूचनाः च अद्यतनं कर्तुं आवश्यकं भविष्यति। धान्यशस्यविक्रयणस्य भुक्तिः विभागेन केवलं कृषकलेखेषु भविष्यति।

# हिमाचलप्रदेशे सुरक्षासंस्थाः सजगाः, वासगृहेषु पर्यटकपञ्जीकरणस्य निरीक्षणं कुर्वन्ति



हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।दिल्लीनगरे जातस्य आतङ्कवादीनाम् आक्रमणस्य अनन्तरं हिमाचलप्रदेशस्य सुरक्षासंस्थाः सजगाः सन्ति। राज्यपुलिसमुख्यालयस्य निर्देशानुसारं सर्वेषु जनपदेषु पुलिसस्थानक्षेत्रेषु पुलिसेन गहननिरीक्षणं आरब्धम्। वासगृहेषु, गृहाश्रयालयेषु, अतिथिगृहेषु च निवसतां पर्यटकानाम् अन्येषां च व्यक्तिनां पञ्जीकरणस्य अभिलेखानां परीक्षणं क्रियते। वैधपरिचयं विना समुचितपञ्जीकरणं विना कस्यचित् स्थातुं न अनुमन्यते इति संचालकाः निर्देशिताः।संदिग्धानां परिचयाय पुलिसैः वासकर्तॄणां परिचयपत्राणां निरीक्षणमपि क्रियते। पंजीकरणपंजिकासु अनियमिततां ज्ञात्वा पुलिसैः अनेकस्थानेषु सचेतनाः प्रदत्ताः सन्ति। अधिकारिणः वदन्ति यत् अद्यापि बहवः होटल- सञ्चालकाः ऑनलाइन-पञ्जीकरणं पूर्णं कर्तुं वा सी-प्रपत्रं पूरयितुं वा प्रमादं कुर्वन्ति, येन सुरक्षायाः गम्भीरः संकटः उत्पद्यते। पुलिसेन होटेलस्वामिभ्यः निर्देशः दत्तः यत् ते तत्क्षणमेव संदिग्ध- क्रियाकलापस्य, अनुकृत-परिचय-प्रयोगस्य च सूचनां ददतु। पुलिससाइबरप्रकोष्ठः ऑनलाइन- आरक्षणं, विवरणसत्यापनम् अपि कुर्वन् अस्ति। आतङ्कवादीनाम् आक्रमणानां संकटान् दृष्ट्वा बहिः राज्येभ्यः आगच्छन्ताम् जनानां विषये विशेषनिरीक्षणता क्रियते। राज्यस्य पुलिसमहानिदेशकः अशोकतिवारी अपि राज्यस्य जनेभ्यः आह्वानं कृतवान् यत् ते सतर्काः भवन्तु, यत्किमपि शङ्कितं व्यक्तिं वा क्रियाकलापं वा तत्क्षणमेव पुलिसं प्रति सूचनां ददतु।

## गतदिवसे देशे राष्ट्रियप्रेसदिवसः आचरितः

**हिमसंस्कृतवार्ताः** - गतदिवसे देशे राष्ट्रियप्रेसदिवसः आचरितः । अयं हि दिवसः भारतीयप्रेसपरिषदः स्थापनायाः प्रतीकभूतो वर्तते, षट्षष्ट्यधिकएकोनविंशे शताब्दे अस्मिन् एव दिवसे संचारतन्त्रं कस्यचित् स्वतन्त्रप्रहरिणः रूपेण कार्यस्य आरम्भम् अकरोत्। केन्द्रियसूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् देशस्य लोकतन्त्रे प्रेस इत्यस्य भूमिका महत्त्वपूर्णा विद्यते। नवदेहल्यां राष्ट्रियप्रेसदिवसः पंचविंशत्यधिकद्विसहस्रतमे समारोहे भाषमाणः श्रीवैष्णवः अवदत् यत् अस्मिन् अवसरे असमीचीनसूचनातन्त्रस्य कथंचित् समापनं स्यात् अपि च प्रेस इत्यस्य विश्वसनीयतायाः इतोपि द्रढीकरणं स्यात् इत्यस्मिन् विषये व्याख्यानमपि आयोजितम् आसीत्, श्रीवैष्णवः अस्मिन् अवसरे मीडियाजगतः सर्वेषां कार्यकर्तॄणां कृते शुभाशयाः अपि प्रदत्तवान्।

# उत्तराखण्डसंस्कृताकादम्या आयोजिते संस्कृत महोत्सवे खण्डस्तरीय कनिष्ठवर्गीय संस्कृतस्पर्धाः सम्पन्नाः




**हिमसंस्कृतवार्ताः देहरादूनम्** - राजपुरमार्गस्थिते कन्या गुरुकुलस्य प्राङ्गणे खण्डस्तरीय कनिष्ठवर्गीय संस्कृतश्लोकस्पर्धासु समूहगानं समूहनृत्यं वादविवादः आशुभाषणं संस्कृतनाटकं चेति षट्सु स्पर्धासु प्रतिभागिनः सोत्साहं भागं निर्व्यूढवन्तः। कार्यक्रमस्य आरम्भः द्रोणस्थली आर्षकन्या गुरुकुलस्य छात्राभिः कृतः वैदिकमंगलाचरणेन कृतम्। ततः श्री परशुराम चतुर्वेदविद्यालयस्य बटुकैः समागतानामतिथीनां समादरः स्वागतगीतं विहितम्। कार्यक्रमस्य अध्यक्षतां पूर्वप्राचार्यः संस्कृतविद् श्री नत्थी लाल भट्टः उक्तवान् यत्संस्कृतभाषायाः संवर्धने तस्य नैरन्तर्यसमर्पणमपेक्षितम्। मुख्यातिथिरूपेण उत्तराखण्ड अशासकीयविद्यालयप्रबन्धक संघस्य संरक्षकः पूर्वप्रशासनिकाधिकारी श्री चन्द्रमोहनसिंहपयालः शासनस्य संस्कृतेन संबद्धानां योजनानां विषये उत्क्वा छात्रच्छात्राणां प्रोत्साहनम् अकरोत्। विशिष्टातिथिरूपेण आचार्यः पवन कुमार शर्माऽवोचत् वेदसंरक्षणे संस्कृतप्रचारप्रसारे विद्यार्थिनां महती भूमिका।

समापनसत्रे प्रतिभागिनाम् उत्कृष्टप्रदर्शनं सर्वैरपि प्रशंसितम्। समापनसमारोहे मुख्यातिथिरूपेण खण्डशिक्षाअधिकारी श्रीमती हेमलता गौड उनियालः स्वीये कथनेऽवदत्संस्कृतस्य वैश्विकमहत्त्वं सर्वैरपि अधुना अवगम्यते। संस्कृतभाषा केवलं भाषा न अपि तु भारतस्य ज्ञानपरम्परायाः प्राणरूपा अस्ति। सा बालप्रतिभागिनः उत्साहसम्पन्नं सहभागं प्रति अभिनन्द्य संस्कृताध्ययनस्य अभ्यासस्य च जीवनमार्गे स्वीकरणं प्रोत्साहितवती। समापनसत्रस्य अध्यक्षतां डा राम भूषण बिजल्वाणः पृष्ठपोषणं विधाय प्रतिभागिभ्यः प्रणामपत्रम् अददात्। स आयोजकान् सफलतया कार्यक्रमस्य निर्वहणाय अभिनन्द्य अवदत् यत् एतेषु आयोजनेषु विद्यार्थिनां आत्मविश्वासः अभिव्यक्तिक्षमता भाषादक्षताः च वर्धन्ते। संस्कृतभाषां आधुनिकशिक्षणप्रणाल्या सह योजयितुं अकादम्याः प्रयासाः प्रशंसनीयाः सन्ति। सत्रसमाप्तौ संयोजकेन आचार्येण नवीन भट्टेन सर्वासां स्पर्धानां विजेतृनामावली घोषिता। तेन अतिथीनां निर्णायकानां अध्यापकानां छात्रछात्राणां सहयोगिनां च सर्वेषां कृते धन्यवादः अर्पितः। निर्णायकमण्डलम् आगतविद्वांसः च विजेतृविद्यार्थिभ्यः प्रमाणपत्राणि पुरस्कारराशिश्च प्रदत्तवन्तः। कार्यक्रमे छात्रच्छात्रिभिः कृताः वैदिकमन्त्रच्चाराः विविधाः संस्कृतप्रस्तुतयः च वातावरणं आध्यात्मिकसांस्कृतिकगौरवेण पूरितवन्तः। एवं खण्डस्तरीयाः कनिष्ठवर्गीयाः संस्कृतस्पर्धाः उत्साहेन अनुशासनेन सांस्कृतिकसमृद्ध्या च सफलतया सम्पन्नाः। संस्कृतभाषायाः संरक्षणे संवर्धने च अस्य सार्थकप्रयत्नस्य सर्वत्र प्रशंसा क्रियते।

## प्रतियोगितासु विजेतृणां सूची

*संस्कृतश्लोकोच्चारणस्पर्धायां प्रथमस्थानं द्रोणस्थली आर्षकन्या गुरुकुलस्य छात्रा गौरी सचदेवा, द्वितीयस्थानं श्री परशुराम चतुर्वेदविद्यालयस्य छात्रः रोहित पन्तः, तृतीयस्थानं श्री शिवनाथ संस्कृतमहाविद्यालयस्य छात्रः हर्षित पन्तः, संस्कृतनाटके प्रथमस्थानं द्रोणस्थली आर्षकन्या गुरुकुलं द्वितीयस्थानं, कन्या गुरुकुलमहाविद्यालय तृतीयस्थानं, राजकीय बालिका इन्टरकालेज राजपुरमार्गः संस्कृताशुभाषणस्पर्धायां प्रथमस्थानम्, श्री परशुराम चतुर्वेदविद्यालयः द्वितीयस्थानम्, द्रोणस्थली आर्षकन्या गुरुकुलं तृतीयस्थानम्, कन्या गुरुकुलमहाविद्यालयः संस्कृतवादविवादस्पर्धायां प्रथमस्थानम्, कन्या गुरुकुलमहाविद्यालयो द्वितीयस्थानम्, श्री परशुराम चतुर्वेदविद्यालयस्तृतीयस्थानं द्रोणस्थली आर्षकन्या गुरुकुलं संस्कृतसमूहगानस्पर्धायां प्रथमस्थानम्, श्री परशुराम चतुर्वेदविद्यालयो द्वितीयस्थानम्, द्रोणस्थली आर्षकन्या गुरुकुल तृतीयस्थानम्, श्री शिवनाथ संस्कृतमहाविद्यालयः संस्कृतसमूहनृत्यस्पर्धायां प्रथमस्थानम्, राजकीय इन्टरकालेज राजपुरमार्गः द्वितीयस्थानम्, कन्या गुरुकुलमहाविद्यालयः तृतीयस्थानम्, द्रोणस्थली आर्षकन्या गुरुकुलं प्रथमद्वितीयस्थान-प्राप्तविद्यालयाः जनपदस्तरे प्रतियोगितायां स्थानं सुरक्षितवन्तः।*


उपमञ्चे विभिन्नविद्यालयेभ्यः आगतविद्वांसः डा शैलेन्द्र प्रसाद डंगवालः, डा दीपक नवानी, डा सीमा बिजल्वाणः, दुर्गेश भट्टः, डा आरती गौडः, एकता, डा दीपशिखा, मीरा, सुनीता पवार , श्रीमती अलका, सरिता विष्ट , मुकेश खंडूडी इत्यादयः विराजिताः। अतिथीनां सत्कारः माल्यैः अंगवस्त्रैः स्मृतिचिह्नैः च विहितः।कार्यक्रमस्य संयोजकः आचार्यः नवीन भट्ट समागतानां प्रति धन्यवादं निवेदितवान्।सम्पूर्णकार्यक्रमे मंचसञ्चालनं धीरज मैठाणी कृतवान् प्रास्ताविककथनं डॉ आनन्द मोहन जोशी च कृतवान्।

# ऋणस्य पारदर्शितां सुनिश्चित्य सर्वकारेण श्वेतपत्रं निर्गन्तव्यम्-विक्रमठाकुरः पूर्वमन्त्री



**हिमसंस्कृतवार्ताः- काङ्गड़ा।**पूर्वमन्त्री तथा जसवां-परागपुरस्य विधायकः विक्रमठाकुरः राज्यस्य वर्तमानराजनैतिक- आर्थिकस्थितेः विषये दृढ़-प्रतिक्रियाम् अददत्, जनसमूहः वञ्चितः इति अनुभवति इति अवदत्। संवाददातृभ्यः विज्ञप्तौ सः अवदत् यत् राज्ये अद्यतननिर्वाचनपरिणामाः, राष्ट्रियस्तरस्य उद्भूताः राजनैतिकप्रवृत्तयः च जनस्य प्राथमिकता स्पष्टीकृतवन्तः। सः अवदत् यत् सर्वकारीयकर्मचारिभ्यः आउटसोर्सिंग-कर्मचारिभ्यः च समये वेतनं न दत्तं, वर्षाणां यावत् सेवानिवृत्तकर्मचारिणां चिकित्साबिलानि लम्बितानि, प्रथमवारं च यत् निविदाकर्तारः अदत्तस्य कारणेन वीथिं गच्छन्ति, एताः सर्वाः परिस्थितयः गम्भीरताम् प्रतिबिम्बयन्ति। सः प्रश्नं कृतवान् यत् निरन्तरम् ऋणं स्वीकृत्य अपि वित्तीयप्रतिपूर्तिः सुनिश्चिता न भवति, प्रशासनिकप्रबन्धनस्य प्रमुखम् आह्वानं प्रकाशयति।विक्रमठाकुरः अवदत् यत् गृह्यमाणस्य ऋणस्य पारदर्शितां सुनिश्चित्य श्वेतपत्रं सर्वकारेण निर्गन्तव्यम्, येन राज्ये कोटिरूप्यकाणां केषां वस्तूनाम् उपरि व्ययः क्रियते इति स्पष्टं भवति। सः अवदत् यत् आर्थिकदत्तांशस्य स्थलीयवास्तविकतानां च मध्ये महत्त्वपूर्णः अन्तरः अस्ति, येन जनसन्तुष्टिः वर्धते। युवानां रोजगारस्य च विषयं सम्बोधयन् सः अवदत् यत् अस्थायीव्यवस्थानां न्यूनतमवेतननियुक्तीनां च प्रवृत्तिः वर्धमाना अस्ति, येन युनः असुरक्षिताः अनुभवन्ति। तस्य मते एषा स्थितिः दीर्घकालं यावत् राज्यस्य विकासस्य आधारभूतसंरचनायाः प्र भावं कर्तुं शक्नोति। सः अवदत् यत् वर्तमानसर्वकारस्य वर्षत्रयानन्तरं अपि ठोसजनकल्याणनिर्णयाः न कृताः, प्रशासनिकाह्वानं च अनेकेषु क्षेत्रेषु अवशिष्टम् अस्ति। सः अपि अवदत् यत् राज्यस्य आर्थिकस्थितौ गम्भीरसमीक्षां ठोसनिर्णयानां च आवश्यकता वर्तते।

# एकस्य IAS-अधिकारिणः बालकानां तुलना दरिद्रस्य कृषकस्य बालकैः सह कर्तुं न शक्यते-भारतस्य मुख्यन्यायाधीशः



भारतस्य मुख्यन्यायाधीशः बी.आर. गवई रविवासरे अनुसूचितजातीयानां आरक्षणेषु समर्थतायुक्तं स्तरं न समावेशयितुं स्वस्य समर्थनं पुनः उक्तवान्। '७५ वर्षेषु भारतं जीवितं भारतीयसंविधानं च' इति शीर्षकेण आयोजनं सम्बोधयन् मुख्यन्यायाधीशः अवदत् यत् आरक्षणस्य विषये एकस्य IAS-अधिकारिणः बालकानां तुलना दरिद्रस्य कृषकस्य बालकैः सह कर्तुं न शक्यते। न्यायमूर्तिः गवैः अवदत् यत्, "मया मतं गृहीतम् यत् इन्द्रा साहनी निर्णये यथा दृश्यते तथा समर्थतायुक्तस्तरस्य अवधारणा प्रवर्तनीया। अन्यपिछड़ावर्गेषु यत् प्रवर्तते तत् अनुसूचितजातिषु अपि प्रवर्तनीयम्, यद्यपि अस्मिन् विषये मम निर्णयस्य बहुधा आलोचना कृता अस्ति

# पुल्लिङ्गः स्त्रीलिङ्गः नपुंसकलिङ्गश्चाधारितः (अकारान्तः आकारान्तः इकारान्तादिश्च) वाक्यप्रयोगाभ्यासः



-- डॉ. सन्तोषकुमारकाण्डपालः
सहायकाचार्यः ( शिक्षाशास्त्र-विभागः )
महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी, मध्य-प्रदेशः


रामः एकां नायिकां रमां सुन्दरैः फलैः भगवते हरये अन्येभ्यः मतिभ्यः प्रथक् विचिन्त्य वारिणः प्रबन्धनं कृत्वा स्वीय प्रध्रि पवित्र नद्याः जलं स्वीकृतेभ्यः सुधीजनेभ्यः एका योजना निर्मिता यत्र भानोः प्रकाशे गुरोः आशिषा कामधेनोः कृपाप्रसादेन च मधु सदृशैः वचनैः स्वयम्भूः स्वयं स्व भ्रूं शान्तीकृत्य अर्धनारीश्वरः इत्यस्य स्वरूपमवलम्ब्य मातृ-पितृ स्वरूपे सद्भावनया धात्रा रचित जगतः सृजनं पालनञ्च करोति।रामः स्वपितुः आज्ञापालकः पुत्रोऽस्ति। सः स्वपितुः वचन-पालनार्थं स्वकीया भार्या सीता तथा लक्ष्मणेन सह वनं प्रति जगाम। सीताऽपि पतिव्रत-धर्मस्य पालनार्थं रामेण सह वनं प्रति जगाम।

राजा दशरथः स्वीया राज्ञी कैकेयी द्वारा प्राप्त वचनैः असन्तुष्टो भूत्वाऽपि स्वकीय रघुकुलमर्यादायाः संरक्षणार्थं तथा वचनपालनार्थं राज्ञाः कैकेय्याः असन्तुष्टो भूत्वाऽपि रामं वनवासं प्रति प्रेषितवान्।

यत्र रामः एकः आदर्श पुरुषोऽस्ति तत्रैव सः आज्ञापालकः पुत्रोप्यस्ति। रामेण सह सीताऽपि एका आदर्शयुक्ता भारतीया नार्यस्ति, एतदर्थं साऽपि पतिव्रत धर्मस्य पालनार्थं रामेण सह वनं प्रति जगाम।

यदा रामः वनं प्रति अगच्छत् तदानीं जनैः आश्चर्यचकितो भूत्वा उक्तं यत् सः अगच्छत्! यदा रामेण सह जनकनन्दिनी सीताऽपि अगच्छत् तदानीं जनैः पुनरेकवारम् आश्चर्यचकितो भूत्वा उक्तं यत् किं सा अपि अगच्छत् वा!

राम-सीताभ्यां सह यदा लक्ष्मणोऽपि अगच्छच्चेत्तदा विदुषः जनान् किञ्चित् सान्त्वना अमिलत् यत् वने यदि कन्दमूलादीनि फलानि मिलिष्यन्ति चेत्तर्हि तेषां फलानां प्रबन्धनं तु लक्ष्मणः सत्यनिष्ठया करिष्यति।



हिमसंस्कृतवार्ताः , ईदरधीरजः,

# वार्ता-संवादः

**नन्दिनी**- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या** - नमस्ते नन्दिनि। प्रथमा वार्ता अतीव रोचिका अस्ति। नवेन अनुसन्धानेन रागवर्धक-न्यासर्गस्य, अधिगमनप्रक्रियायाश्च मध्ये एकः प्रमुखः सम्बन्धः प्रकाशितः।

**नन्दिनी** - आम्, एतत्तु शिक्षणक्षेत्राय अतीव महत्त्वपूर्णम्। अग्रिमा वार्ता आशाम् आवहति। नूतनेन 'अतीवसरलेन' औषधेन मूषकेषु मतिभ्रंश-रोगस्य लक्षणानि विपरीतानि कृतानि।

**काव्या** - एषा चिकित्साशास्त्रे महती सिद्धिः। इदानीं एका भिन्ना वार्ता श्रूयताम्। स्ट्यानफोर्ड-वैज्ञानिकैः ज्ञातं यत् जरया कर्कटरोगः कदाचित् निगृह्यते, न तु वर्ध्यते।

**नन्दिनी** - एतत्तु प्रचलितविश्वासस्य विपरीतम्। अन्तिमा वार्ता स्वास्थ्यसम्बद्धा अस्ति। घ-जीवसत्त्वस्य न्यूनस्तरेण सह अवसादस्य दृढः सम्बन्धः दर्शितः।

**काव्या** - आम्, मानसिक-स्वास्थ्येन शारीरिकंस्वास्थ्यं सम्बद्धमेव। अद्य एतावत्येव वार्ताः। धन्यवादः नन्दिनि।

**नन्दिनी** - धन्यवादः काव्ये। दर्शकेभ्योऽपि नमो नमः। पुनः मिलामः।

||ॐ||

# केचन मनसः मौक्तिकाः-

{१} "तृषिताः यात्रिकाः समुद्रतः अपि पुनरागच्छन्ति।
प्रत्येकं जलस्य स्वभावः तृष्णानिवारणम् नास्ति।।"

{२} "तीक्ष्णस्मृतिः मस्तिष्काय हितकरः-
परन्तु विस्मरणसामर्थ्यं हृदयस्य कृते हितकरं भवति!" 💕 💕

{३}" पुस्तकैः सह जनान् पठितुं शिक्षन्तु!
पुस्तकानि ज्ञानं दास्यन्ति मानवाः अनुभवः दास्यन्ति....!!"

{४} "त्वं समज्ञानपूर्णः असि, श्रवणेन अहं श्रान्तः अस्मि!
मम प्रज्ञां विज्ञाय/ अवगत्य कश्चित् आगच्छेत् इति इच्छामि!!!" 💕

{५} "वर्षाजले कोऽपि वर्णः नास्ति! परन्तु, वातावरणं रङ्गमयं करोति!!!!" 💕

डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्

# कानपुरप्रान्ते संस्कृतजागरणाय सामूहिकः गीतापाठः

हिमसंस्कृतवार्ताः, दीनदयालशुक्लः।

संस्कृतभारत्याः कर्णपुरप्रान्तेन संस्कृतस्य काठिन्यभ्रमनिवारणाय सामान्यजनेषु शास्त्रस्वाध्यायस्य सहजां परम्परां विकासयितुं च उत्पन्नैकादश्याः अवसरे एकं विशालं गीतापाठाभियानम् आयोजितम्। अस्य अभियानस्य इदमेवोद्देश्यमासीद् यत् संस्कृतं न क्लिष्टा अपितु सरला सहजा च भाषा वर्तते शास्त्राणामध्ययनं च प्रत्येकं पौरं प्रति सुलभमस्ति।प्रान्तस्य प्रतिष्ठितेषु संस्थानेषु गीताजयन्तीवैदिकन्यासः विविधानि शैक्षणिक-संस्थानानि सांस्कृतिकमञ्चाः सामाजिक-सङ्घटनानि तथा कर्णपुरसहितानां निकटवर्तिजनपदानाम् अनेकानि संस्थानानि च सहभागिताम् अकुर्वन्। विविधेषु विद्यालयेषु महाविद्यालयेषु च विद्यार्थिनः आचार्याः शोधार्थिनः पौराश्च समूहगीतापाठम् आयोजयन्।

राज्यव्यापकाह्वानम्–दिव्यगीताप्रेरणोत्सवस्य गीताजयन्त्युत्पन्नैकादश्याश्चावसरे संस्कृतभारत्याः कर्णपुरप्रान्तेन केषाञ्चन महत्त्वपूर्णानाम् आगामिकार्यक्रमाणां कृते सार्वजनिकम् आह्वानमपि कृतम्।

१.उत्तरप्रदेशस्य मुख्यमन्त्रिणः योग्यादित्यनाथस्य उपस्थितौ दिव्यगीताप्रेरणोत्सवः–पञ्चविंशत्यधिकद्विसहस्रतमे कृष्टाब्दे नवम्बरमासस्य त्रयोविंशतितमे दिनाङ्के लक्ष्मणपुरस्थे जनेश्वरमिश्रोद्याने आयोज्ये अस्मिन् महोत्सवे सहभागिनो भवन्तु।

२. राष्ट्रियस्वयंसेवकसङ्घस्य सरसङ्घचालकस्य डॉ॰भागवतमोहनस्य उपस्थितौ भगवद्गीतायाः व्यापकस्य सांस्कृतिकस्य आध्यात्मिकस्य च सन्देशस्य जनजनपर्यन्तं सम्प्रेषणस्य सङ्कल्पः पुनर्दृढीकरिष्यते। सर्वे पौराः अस्मिन् प्रेरके आयोजने सम्मिलिताः भवेयुरित्याग्रहः कृतः।

३.श्रीमद्भगवद्गीताजयन्ती पञ्चविंशत्यधिक-द्विसहस्रतमे कृष्टाब्दे दिसम्बरमासस्य प्रथमदिनाङ्के आचरिष्यते। संस्कृतभारत्या प्रान्तव्यापिषु विविधस्थानेषु गीताजयन्तीं सामूहिकपाठैः विचारगोष्ठीभिः चित्रप्रदर्शनीभिः मूल्यशिक्षाकार्यक्रमैः गीताप्रेरणयात्राभिश्च सह आचरितुम् आह्वानं कृतम्। संस्थायाः उद्देश्यमस्ति यद् गीता केवलं ग्रन्थो न भूत्वा जीवनमार्गदर्शिकारूपेण समाजेऽधिकतरं प्रतिष्ठिता भवेत्।

उत्पन्नैकादश्या अवसरे प्रान्तस्य अनेकजनपदेषु गीतापाठः संस्कृतजागरणकार्यक्रमाश्चातीव श्रद्धया शास्त्रीयगौरवेण च सम्पन्नाः अभवन्। एतेषु मुख्यरूपेण बांदानगरम् उरईनगरं झांसीनगरं चित्रकूटं फतेहपुरं हमीरपुरं तथा अन्यानि ग्रामीणनगरीयक्षेत्राणि च समाविष्टान्यासन्। शतशः स्थानेषु परिवारैः छात्रसमूहैः साहित्यिकमञ्चैः सामाजिकसंस्थाभिश्च स्वप्रेरणया गीतापाठः कृतः। संस्कृतभारत्याः प्रान्तमन्त्री डॉ॰त्रिवेदीरत्नेशकुमारः अवदद् यद् अस्माकमुद्देश्यं सङ्कल्पश्चायमस्ति यत् संस्कृतशिक्षणं सरलमस्तीति भावना जनमानसे स्थाप्येत शास्त्रस्वाध्यायस्य परम्परा समाजे पुनः सशक्ता भवेत् युवसु गीतोपनिषद् रामायणमहाभारतादीनां ग्रन्थानामध्ययनं प्रति रुचिः वर्धेत भारतीयसंस्कृतेः मूलभूतममूल्यं ज्ञानम् अनुशासनं कर्तव्यं नैतिकता च जीवने अवतरेयुः। गीतापाठस्यैषोऽभियानः प्रान्ते संस्कृतसंस्कृतिभ्यामुभाभ्यां प्रति नूतनां जागृतिम् उत्पादयिष्यति आगामिकार्यक्रमेषु च जनसहभागिता निरन्तरं वर्धिष्यते।

डॉ॰रत्नेशकुमारत्रिवेदी
प्रान्तमन्त्री
संस्कृतभारती कर्णपुरप्रान्तः

# २०२८ तमवर्षपर्यन्तं इसरो चन्द्रयान-४ इत्यस्य प्रक्षेपणं भविष्यति



हिमसंस्कृतवार्ताः। भारतं अन्तरिक्षे नूतनानि मापदण्डानि स्थापयति। अस्याः सफलतायाः पृष्ठे सर्वे इस्रो वैज्ञानिकाः सन्ति । इस्रो इदानीं पुनः एकवारं विश्वे स्वस्य पराक्रमं प्रदर्शयितुं सज्जः अस्ति। अस्मिन् वित्तवर्षे सप्तप्रक्षेपणानि भविष्यन्ति। भारतस्य प्रथमं मानवीयं अन्तरिक्षयानं २०२७ तमवर्षपर्यन्तं प्रक्षेपणस्य योजना अपि प्रचलति।इसरो अध्यक्षः वी. नारायणनः अपि एकस्मिन् साक्षात्कारे उक्तवान् यत् इसरो इत्यस्य अन्तरिक्षयानस्य उत्पादनक्षमता त्रिगुणा भविष्यति इसरो-अध्यक्षः वी. नारायणन् इत्यनेन उक्तं यत् इस्रो विज्ञान-प्रौद्योगिक्याः, उद्योग-क्षमतायाः च तीव्रविस्तारस्य कालखण्डे अस्ति । इस्रो सप्तप्रक्षेपणानां योजनां कुर्वन् अस्ति, यत्र वाणिज्यिकसञ्चार उपग्रहः, अनेकानि पीएसएलवी, जीएसएलवी च अभियानानि सन्ति । एकः महत्त्वपूर्णः आकर्षणः प्रथमः पीएसएलवी भविष्यति यः पूर्णतया भारतीयः भविष्यति। इस्रो-प्रमुखेन इदमपि उक्तं यत् चन्द्रात् प्रतिरूपकाणि ग्रहीतुं जटिलमभियानम् चन्द्रयान -४ इति सर्वकारेण अनुमोदितम्। अपि च इसरो इत्यस्य लक्ष्यं २०२८ तमे वर्षे चन्द्रयान-४ इत्यस्य प्रक्षेपणं करणीयम् अस्ति ।तदतिरिक्तं जापान एयरोस्पेस् अन्वेषण एजेन्सी (JAXA) इत्यनेन सह सहकारेण चन्द्रध्रुवीय अन्वेषणकार्यक्रमे कार्यं प्रचलत